श्रीगरुडध्वजसपाद शतकम्

(स्तोत्रकाव्यम्)

प्रणेता
डा० रामकिशोर मिश्रः

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहारः, नयी दिल्ली-११००५९

श्रीगरुडध्वजसपादशतकम्

(स्तोत्रकाव्यम्)

प्रणेता :

डा० रामकिशोर मिश्रः

एम०ए०, पीएच०डी०

साहित्याचार्यः, व्याकरणाचार्यः

संस्कृत-विभागाध्यक्षः

श्री महामना मालवीय डिग्री कालेजः

खेकड़ा (मेरठ)

१९८६

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

श्रीगरुडध्वजसपादशतकम् (स्तोत्रकाव्यम्)

लेखक: : डा० रामकिशोर मिश्रः

प्रकाशक: : देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नई दिल्ली-११००५९

मुद्रक: : प्रवीण प्रिंटिंग सर्विस
३५, टी एक्सटेंशन, उत्तम नगर,
नई दिल्ली-११००५९

संस्करणम् : प्रथमम्, दिसम्बर १९८६

मूल्यम् : द्वादश रूप्यकाणि रु० १२-००

Śrīgarudadhvajasapāda-śatakam

Author : Mishra, Dr. Ram Kishor

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printer : Parveen Printing Service
35, T Extn., Uttam Nagar,
New Delhi-110059

Edition : Frist, December 1986

Price : Rupees Twelve only Rs. 12-00

प्रास्ताविकम्

'देववाणी-परिषद्, दिल्ली' इत्येतस्याः संस्थायाः पञ्जीकरणं १३-१२-१९८६ ई० तारिकायां सञ्जातम्। अस्या उद्देश्येषु संस्कृतभाषा-निबद्धानां संस्कृतसाहित्यविषयकाणां वा ग्रन्थानां प्रकाशनमप्यन्यतम-मुद्देश्यमस्ति। तदनुसारमद्यावधि परिषदा राजस्थान-पञ्चाम्बु-उत्तरप्रदेश-बिहार-प्रभृतिराज्येषु दिल्ल्यां च जन्मभाजां कार्यजुषां वा लेखकानां पञ्चाशत्सङ्ख्याका ग्रन्थाः प्रकाशिताः। एतेषु ग्रन्थेषु अधिकांशतः ग्रन्थाः संस्कृतभाषामाध्यमेन विरचिताः सन्ति; केचन साङ्ग्ल-हिन्द्यनुवादा अपि सन्ति; केचन पुनः हिन्दीभाषामाध्यमेन संस्कृतसाहित्यं परिचाययन्ति।

इदानीञ्च परिषदा उत्तरप्रदेशे एटाजनपदस्थ 'सोरों' नगरे १९९५ तमे वैक्रमाब्दे फाल्गुनमासे शुक्लपक्षे षष्ठ्यां तिथौ शनिवारे श्रीमत्यां कलावत्यां श्रीहोतीलालमिश्रमहाभागात्समुत्पन्नस्य, एम०ए०-पीएच०डी-साहित्य-व्याकरणाचार्याद्युपाध्यलङ्कृतस्य, 'काव्यकिरणावलिः,' 'त्यागपत्रनिरासम्' 'पत्नीत्यागम्' 'अन्तर्दाहः,' 'विद्योत्तमाकालिदासीयम्,' अङ्गुष्ठदानम्' इत्ये-तदादिविविधकाव्यनाटकोपन्यासादिग्रन्थकर्तुः अद्यत्वे च मेरठमण्डलान्तर्गत-'खेकड़ा' स्थस्य महामनामालवीयडिग्रीकालेजस्य संस्कृतविभागे प्रवक्तृपदमलं-कुर्वाणस्य आचार्यश्रीरामकिशोरमिश्रमहाभागस्य 'श्रीगरुडध्वजसपादशतकम्' एकपञ्चाशत्तमग्रन्थरूपेण प्रकाश्यते।

कविनाऽस्य सपादशतकस्य रचना २०४३ तमे (कालोदधिखात्माब्दे) चैत्रमासे शुक्लपक्षे कृता। अस्य तथ्यस्य प्रकाशनं तेन १३० तमे पद्ये कृतम्। कविना आदितः १२९ तमपद्यपर्यन्तं वसन्ततिलकावृत्तं निर्व्यूढम्; प्रत्येकं पद्यं चतुर्थपादे 'तस्मै नमो भगवते गरुडध्वजाय' इति मुकुटेन चालङ्कृतम्। गरुडध्वजं भगवन्तं विष्णुं काव्यविधिना वसन्ततिलकेन च परिवर्णयता कविवरेण मिश्रमहाभागेन 'विष्णुसहस्र-नामस्तोत्रा'न्तर्गतानां विष्णोः विष्णु-अच्युत-आदिदेव-गरुडध्वज-उपेन्द्र-नारायण-वैकुण्ठ-पुरुषोत्तम-यज्ञ-जनार्दन-अधोक्षज-हरि - चतुर्भुज - राम-

कृष्ण-देव-सर्व-शौरि-वनमालि-गोविन्द-माधव-केशव-श्रीगर्भ- हिरण्यगर्भ-हिरण्यनाभ-दण्ड-समीरण वैद्य-जह्नु-प्रभृतिप्रथमान्तनाम्नां (विशेषणानां वा) प्रथमा द्वितीया-चतुर्थीविभक्तिषु उपयोगः कृतः, यथा—

नित्यं नमामि पुरतो यमहं स्वभक्त्या, रामः स यत्र मुनियोगिवरा रमन्ते ।
यं रामदेवमधुना हृदये भजामि, तस्मै नमो भगवते गरुडध्वजाय ।।

क्वचित्कविना 'विष्णुसहस्रनामस्तोत्र'स्थपदेषु वृत्तानुरोधेन किञ्चित्परिवर्तनमपि कृतम् यथा—पद्मनाभ-विष्वक्सेन-श्रीवत्सवक्षा-लोकनाथ-शार्ङ्ग-धन्वा-स्वयम्भू-मधुसूदन-त्रिविक्रम-चक्री-सिद्धार्थप्रभृति-पदानि कमलनाभ-विष्वग्बल-श्रीवत्सलाञ्छन-लोकेश्वर - शार्ङ्गी-स्वभू-मधुरिपु-त्रिपराक्रम-चक्रपाणि-सिद्धार्थवदादिरूपे परिवर्तितानि ।

एतदतिरिक्तम् कविना अन्यान्यपि भगवन्नामानि विष्णुनामसु परिगणितानि यथा—

अल्लः स यो मुसलमाननृणां खुदा च, यः कथ्यतेऽत्र गिरजासु च गौड आंग्लैः ।
विष्णुः स स एव बहुदेशजरूपभिन्नः तस्मै नमो भगवते गरुडध्वजाय ।।११३।।

अत्र काव्ये भगवतो विष्णोर्विविधाः कथा अपि संकेतिताः सन्ति ।

नूनं हि कविवरेण मिश्रमहाभागेन पाठकानां कृते सा पुण्यमयी सामग्री पुनः प्रस्तूयते या विष्णुसहस्रनाम-श्रीमद्भागवतादिमहनीयग्रन्थेषु अस्माकं पूर्वर्षिभिः प्रस्तुतासीत् । इदं हि काव्यं कवेः पाण्डित्यस्य, कवित्वस्य भक्तिभावस्य च परिचायकमस्ति । कविनात्र अल्पेन बहूक्तम् ।

अहमस्य काव्यस्य रचनार्थं कविवराय श्रीरामकिशोरमिश्रमहाभागाय भूयो भूयोऽभिनन्दनं व्याहरामि ।

रमाकान्त शुक्लः

६, वाणी-विहारः,
नयी दिल्ली-११००५९
१३ दिसम्बर, १९८६ ई०
देववाणी-परिषदः स्थापनायाः दशाब्दपूर्तिदिवसः

(डा० रमाकान्त शुक्लः)
महासचिवः
देववाणी-परिषद्, दिल्ली

श्रीरामकिशोरमिश्रप्रणीतम्

श्रीगरुडध्वजसपादशतकम्

।। तस्मै नमो भगवते गरुडध्वजाय ।।

(१)

विष्णुं रमारमणमच्युतमादिदेवम्,
विश्वम्भरं सलिलशायिनमादिवन्द्यम् ।
वन्दे वसन्ततिलकेन तु छन्दसा यम्,
तस्मै नमो भगवते गरुडध्वजाय ।।

(२)

विष्णुस्तवं कुरु हि लेखनि ! सावतारम्,
श्रीमानदृश्य इह योऽस्त्यवतारदृश्यः।
गृह्णाति यः स्वजननं जगतीहिताय,
तस्मै नमो भगवते गरुडध्वजाय ।।

(३)

पीताम्बरं कमलनाभमुपेन्द्रदेवम्,
नारायणं प्रियसुरं कमलाधवं च ।
वैकुण्ठनाथमधुना यमहं स्मरामि,
तस्मै नमो भगवते गरुडध्वजाय ।।

(४)

दैत्यारये भुवि नमः पुरुषोत्तमाय
पद्माधवाय दिवि वा नरकन्तका ।
प्राचीनयज्ञपुरुषाय जनार्दनाय
तस्मै नमो भगवते गरुडध्वजाय ।।

(५)

पीयूषपानमिह सागरमन्थनात्तम्
य: प्राविशत्सुरगणेष्वसुरो हि कर्तुम् ।
चक्रेण तस्य किल शीर्षमखण्डयद्य:,
तस्मै नमो भगवते गरुडध्वजाय ।।

(६)

उच्चैश्श्रवाश्च तुरगः सजवः समुद्रात्,
लक्ष्मीश्च कौस्तुभमणिश्च हि येन लब्धा: ।
सिन्धौ च यस्य वितता त्वहिशेषशय्या,
तस्मै नमो भगवते गरुडध्वजाय ।।

(७)

इन्द्रानुजं भुजगशायिनमादिपूज्यम्,
लक्ष्मीपतिं जलधिजारमणं रमेशत्म् ।
देवेन्द्रदेवमधुना यमहं भजामि,
तस्मै नमो भगवते गरुडध्वजाय ।।

(८)

विष्वक्बलाय जगतीपतयेऽच्युताय
विश्वम्भराय भुवि नित्यमधोक्षजाय ।
पीताम्बराय हरये च चतुर्भुजाय
तस्मै नमो भगवते गरुडध्वजाय ।।

(९)

नारायणो जलधिवासकर: स विष्णु:
श्रुत्वाऽऽर्तनादमुदधौ करिणो गतस्तम् ।
ग्राहं च यस्तमवधीद् गजमुक्तिदाता,
तस्मै नमो भगवते गरुडध्वजाय ।।

(१०)

रामावतारमुपगम्य स लोकभूत्यै
दैत्यान् जघान खरदूषणरावणादीन् ।
यं रावणारिमधुना शरणं व्रजामि
तस्मै नमो भगवते गरुडध्वजाय ।।

(११)

यो द्वापरे तदनु गोपवरेशकृष्णः
कंसं जघान जगतीसुखकारणाय ।
यं कंसशशत्रुमधुना मनसा स्मरामि
तस्मै नमो भगवते गरुडध्वजाय ।।

(१२)

देवाय सर्वविधपापभयापहाय
सर्वाय सर्वविधमङ्गलसौख्यदाय ।
भक्तस्य सर्वविधकीर्तिविवर्धकाय
तस्मै नमो भगवते गरुडध्वजाय ।।

(१३)

प्रचीनमादिपुरुषं मुरमर्दनं च
श्रीवत्सलाञ्छनमहं पुरुषोत्तमं यम् ।
हर्षेण काव्यविधिना परिवर्णयामि
तस्मै नमो भगवते गरुडध्वजाय ।।

(१४)

लोकादिपालकवरं नरकान्तकं च
दैत्यारि-शौरि-वनमालिपदावगम्यम् ।
दामोदरं यमधुना मनसा भजामि
तस्मै नमो भगवते गरुडध्वजाय ।।

(१५)

श्वेताम्बराय बहुरूपविभाधराय
लोकेश्वराय च निशाचरनाशकाय ।
नारायणाय गगनाभशरीरकाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(१६)

शार्ङ्गी स्वभूर्मधुरिपुस्त्रिपराक्रमश्च
श्रीशश्चतुर्भुज इह प्रभुचक्रपाणिः ।
नामानि यस्य जगति प्रथितानि सन्ति,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१७)

गोविन्द - माधव - जनार्दननामसेव्यम्,
तं विष्टरश्रवसमर्चति काव्यकर्ता ।
संसाररूपमिह यं शरणं प्रपद्ये,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१८)

दामोदराय हरये वनमालिने च
कंसारये च बलिने मधुसूदनाय ।
श्रीशाय कैटभजिते बलिनाशकाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(१९)

शौरिं महामि च हरिं तमनादिदेवम्,
श्रीकेशवं च महनीयमुकुन्दमीशम् ।
भक्तप्रियं यमृषिकेशमहं नमामि
तस्मै नमो भगवते गरुडध्वजाय ॥

(२०)

भक्तं स रक्षति सदा विकृतिं च दृष्ट्वा
तन्नारदाय कपिरूपमदाद् दयालुः ।
यं भक्तरक्षकमहं मनसा भजामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(२१)

पूताय पूतपुरुषाय महास्वनाय
सत्याय सर्वविधयोगविनिस्सृताय ।
सिद्धिप्रदाय नरसत्यपराक्रमाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(२२)

संकीर्तयस्व रसने ! प्रभुनामराशिम्,
विष्णो ! त्वमेव भगवान् करुणाकरोऽसि ।
त्राता भवस्य भुवनेऽस्ति जनार्दनो य-
स्तस्मै नमो भगवते गरुडध्वजाय ॥

(२३)

श्रीमन् ! सरोजति यदा तव पाणिपादं,
तस्मिन्मिलिन्दति तदाऽत्र मनो मदीयम् ।
यं पद्मपादमधुना मनसा स्मरामि
तस्मै नमो भगवते गरुडध्वजाय ॥

(२४)

धर्मस्य हानिरभवद् भुवि यत्र तत्र
दुष्टान् स हन्तुमकरोदवतारमत्र ।
यं विष्णुदेवमधुना हृदये करोमि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(२५)

भस्मासुरं खलपतिं विनिहन्तुमीशो
विष्णुर्हरिः स भगवान् जगतोहिताय ।
स्वीयं च यो विहितवान् रमणीयरूपम्,
तस्मै नमो भगवते गरुडध्वजाय ॥

(२६)

श्रीशाय सद्ब्रमणसत्यपरायणाय
श्रीदाय सद्गतिवराय शताननाय ।
श्रीलाय शान्तिभवनाय सनातनाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(२७)

यस्मिन्वसन्ति हि चराचरजीवबीजाः
प्रादुर्भवन्ति किल तत्र च जीविनस्ते ।
अन्ते च यत्र निखिला विलयं प्रयान्ति,
तस्मै नमो भगवते गरुडध्वजाय ॥

(२८)

ओजोद्युतिं वसुबलं रवितापनं यम्,
स्पष्टाक्षरं जगति कीर्तिकरं नमामि ।
ऋद्धं प्रकाशनपरं यमहं स्मरामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(२९)

सोमाय सोमपवराय सुसोमदाय
विश्वात्मने प्रणवरूपधृते शमाय ।
स्वस्तीश्वराय नियमाय सुजीवनाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(३०)

चित्तं मयूरति सदा मम विश्वबन्धो !
यस्त्वां सुकेकति विभुं जगदादिदेवम् ।
यो गोपतिः सुरपतिर्जगतीपतिश्च
तस्मै नमो भगवते गरुडध्वजाय ॥

(३१)

यं श्रीपतिं वसुपतिं धिषणापतिं च
पुण्यं पवित्रहृदयं परिपूतकीर्तिम् ।
ब्रह्मण्यदेवमधुना यमहं भजामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(३२)

श्रीभावनाय सुरपूजितविक्रमाय
पूर्णाय पूर्णपुरुषाय च पावनाय ।
वीराय दैत्यदनुजादिविनाशकाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(३३)

श्रीगर्भ ! भानद ! सुदर्शन ! दैत्यजिष्णो !
सेतुः समस्तजगतोऽसि महाशनस्त्वम् ।
यज्ञोऽस्ति यज्ञपुरुषोऽस्ति महासखो यः,
तस्मै नमो भगवते गरुडध्वजाय ॥

(३४)

पूतात्मपूतपुरुषस्त्विह पावनात्मा,
भूतात्मभूतभवनो भुवि भूतभर्ता ।
साक्षी प्रधानपुरुषो जगतः सदा यः,
तस्मै नमो भगवते गरुडध्वजाय ॥

(३५)

धातासि धातुपुरुषो जगतो विधाता,
त्वं पद्मनाभ! परमस्त्वसि विश्वकर्मा ।
देवाधिदेवमधुना यमहं श्रयामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(३६)

विद्याविदे प्रणवतत्त्वविदे पणाय
सत्स्रग्विनेऽखिलकृते रुचिराङ्गदाय ।
श्रेष्ठाय धामपतयेऽघविदारणाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(३७)

बभ्रुं वृषाकृतिमहं जगदादिजं यम्,
वन्दे विभुं विधिमजं वसुविश्वयोनिम् ।
शर्मा सदा य इह पावनविश्वरेताः,
तस्मै नमो भगवते गरुडध्वजाय ॥

(३८)

कर्ताऽस्यनादिनिधनः प्रभवः स्वयम्भूः,
हर्ताऽसि सर्वजगतो भगवंस्त्वमेव ।
वन्दे ध्रुवं स्वहृदि यं प्रभुपुष्कराक्षम्,
तस्मै नमो भगवते गरुडध्वजाय ॥

(३९)

सम्मोहनाय यमिनां सुरसुन्दराय
वाग्मीश्वराय परमाय यतीश्वराय ।
लक्ष्मीधराय जलधौ फणिविश्रमाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(४०)

यश्चात्मवान्प्रणयवान्छमवान् दयावान्
गीर्वाणवान् सुरथवान् रसवान् रसावान् ।
संभोगवान् सुरतवान् रयवान् रमावान्,
तस्मै नमो भगवते गरुडध्वजाय ॥

(४१)

सञ्ज्ञानवन्तमृतवन्तमनादिमन्तम्,
श्रीमन्तमैक्यधनवन्तमधैर्यवन्तम् ।
कुर्वन्तमन्तमसुरस्य च यं नमामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(४२)

लोकेश्वराय जनपापभयापहाय
पूतात्मने परमयोगविदां वराय ।
भूतादये जननमृत्युविवर्जिताय
तस्मै नमो भगवते गरुडध्वजाय ॥

(४३)

भूगर्भ ! सर्वगवरोऽसि हिरण्यगर्भ-
स्त्वं विक्रमी बहुशिरा असि वत्सरोऽसि ।
वेधा महाकृतिकरोऽखिलदर्शनो य-
स्तस्मै नमो भगवते गरुडध्वजाय ।

(४४)

विश्वाधिपं स्वरधिपं जयसत्यसन्धम्,
दाशार्हमक्षरमतीन्द्रियमेकनाथम् ।
श्रीवासमद्य यमहं शरणं प्रपद्ये,
तस्मै नमो भगवते गरुडध्वजाय ॥

(४५)

शिल्पादिकर्म विविधं निगमादि सर्वम्,
सांख्यंच येन जनितं मतिमान् हि विन्ते।
भूसूर्यचन्द्रखदिशा अपि येन जाताः,
तस्मै नमो भगवते गरुडध्वजाय ॥

(४६)

ज्येष्ठं प्रतर्दनवरं प्रभुलोहिताक्षम्
ईशानमात्मलबपूजितमात्मशक्तिम्।
शर्मेश्वरं शरणदं यमहं महामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(४७)

सर्वेश्वराय समसत्यसमाहिताय
सर्वादये वसुयमाय कृताकृताय।
तेजोद्युतिप्रबलभागुणसंग्रहाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(४८)

बुद्धिर्मनोधृतिबले च तथेन्द्रियाणि,
सत्त्वं सुखं स्मृतिकृती अपि जन्ममृत्यू।
आचारधर्मसुकृतानि वशे च यस्य,
तस्मै नमो भगवते गरुडध्वजाय ॥

(४९)

सर्गोऽस्ति यो वसुमनाश्च हिरण्यनाभः,
शास्ता सहस्रचरणः स सहस्रमूर्धा।
नाथं नमामि यमहं नरसिंहकायम्,
तस्मै नमो भगवते गरुडध्वजाय ॥

(५०)

दुष्टापहाय निमिषाय सुरारिहाय
सम्मर्दनाय सुरवंशविवर्धनाय ।
संक्षोभणाय हरये समितिञ्जयाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(५१)

रोगा जरा च विभयं च भयं च तेजः,
कीर्तिर्यशस्त्वपयशश्च बलञ्च वीर्यम् ।
भोगाश्च मोक्ष इह यस्य वशे वसन्ति,
तस्मै नमो भगवते गरुडध्वजाय ॥

(५२)

भोक्ता स विश्वरमणीरमणोऽस्त्युपेन्द्रः,
संसिद्धिमानमृतपायिवरोऽस्त्यतीन्द्रः ।
भोगेश्वरं यमधुना मनसा भजामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(५३)

संवर्तकाय भुवने रविलोचनाय,
संवत्सराय विभवे सुरमोदनाय ।
गुह्याय गुप्तपुरुषाय गदाधराय,
तस्मै नमो भगवते गरुडध्वजाय ॥

(५४)

कालस्वरूपमधिपं जगतः प्रणम्यम्,
भर्तारमाधिगणहं पृथुमर्थमाद्यम् ।
स्मृत्वा प्रणौमि यमहं प्रभुवेङ्कटेशम्,
तस्मै नमो भगवते गरुडध्वजाय ॥

(५५)

चक्रेश्वरो दमयिता स सहस्रनेत्रो
रक्ताभसूर्यनयनः शिशिरो यतीशः ।
यं गोविदां पतिमहं मनसाश्रयामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(५६)

लोकात्मने गुरुतमाय सहस्रपादे
वेदादिदिव्यगुणभादिसमाहिताय ।
धर्मात्मने विविधधर्मविभूषिताय
तस्मै नमो भगवते गरुडध्वजाय ॥

(५७)

आवर्तनो नरवरः शुचिमानमृत्युः
संकल्पवानमृतवानमरार्चितः स. ।
ओजोनिधिः श्रुतिनिधिः करुणानिधिर्यः,
तस्मै नमो भगवते गरुडध्वजाय ॥

(५८)

संसारवन्तमसुमन्तममूर्तिमन्तम्,
हेमाङ्गवन्तमघमूर्तिविनाशवन्तम् ।
उद्दीप्तिमन्तमधुना यमहं भजामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(५९)

सर्वादिमच्युतममोघमनादिमीशम्,
दुर्मर्षणं दनुजहं दुरतिक्रमं च ।
स्वर्गेश्वरं यमधुना शरणं प्रयामि
तस्मै नमो भगवते गरुडध्वजाय ॥

(६०)

योगात्मने नयविदे समदर्शिने च,
मुक्तात्मने धृतिमते च समीहनाय ।
देवाय देवसुहृदे च परिग्रहाय,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६१)

सर्वज्ञमादिपुरुषं हरिमव्ययं यम्
जन्मादिबन्धनपरं प्रभुपद्मनाभम् ।
भ्राजिष्णुमद्य दमनं हृदयेन नौमि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६२)

व्यापी गुर्निधिपर्तिजितकोपवत्सी
संसारबीजमिति बुद्धिवरैर्य उक्तः ।
त्रातारमद्य यमहं शरणं प्रपद्ये,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६३)

तं ज्ञानगम्यमतिविक्रममाधिहीनम्,
वन्दे मनोहरवरं कमलामनोज्ञम् ।
अम्भःशरीरमधुना यमहं नमामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६४)

स्वाङ्गाय सम्मतिमते जगतीकराय
वाणीविदे पुरजिते पुरुषोत्तमाय ।
संकर्षणाय कनकाङ्गदिनेऽच्युताय
तस्मै नमो भगवते गरुडध्वजाय ॥

(६५)

वृद्धात्म - पद्मि - सुरशूर - महाक्षरूपो
देवात्मधुर्य इह पद्मनिभेक्षणोऽसौ ।
वन्दे सुरारिनिधनं यमहं सुरेशम्,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६६)

विष्णुं कृताऽकृतविदं सुरशक्तिमन्तम्,
प्राणप्रदं क्षमगतिं ऋतुवीरवन्तम् ।
योगेश्वरं त्रिचरणं यमहं श्रयामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६७)

कालज्ञमीशममरं परमं परर्द्धिम्,
पुष्टं पुरन्दरमहार्चनयाऽतितुष्टम् ।
नौमि प्रभुं यमधुना विभुमप्रमत्तम्,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६८)

यः सम्प्रमर्दनवरो जगदौषधात्मा,
ब्रह्मादिदेवपरिपूजितनैकमायः ।
यं नैकरूपमधुना मनसा स्मरामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६९)

गुप्तं त्रिविक्रममहं गतिसत्तमं तम्,
स्वक्षं महाशमकरं शरणं प्रयामि ।
यं रत्नगर्भमधुना मनसाऽऽश्रयामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(७०)

पीयूषदाय कृतये द्रविणप्रदाय
वृक्षाय सर्वजगतः परिरक्षणाय।
नैकात्मने सुरकृते विजयप्रदाय
तस्मै नमो भगवते गरुडध्वजाय॥

(७१)

संप्रीतिमान् प्रणतिमान् मतिमान् वपुष्मान्,
त्रैलोक्यमान् प्रबलवान् स्थववान् यशस्वान्।
संहर्षवान् युवतिमान् रतिमान् य उक्तः,
तस्मै नमो भगवते गरुडध्वजाय॥

(७२)

देवार्हे-वेदनयनार्ह-नयार्हनामा,
पीयूषदुग्धघृतपूजितपाद आर्यः।
अन्नाद आत्मनययोगबली य ईश-
स्तस्मै नमो भगवते गरुडध्वजाय॥

(७३)

गोस्वामिनं जगति धर्मवतामधीशम्,
यं पद्मपाणिमघनाशकमादिजीवम्।
श्रीवत्सलाञ्छनमहं हृदये भजामि,
तस्मै नमो भगवते गरुडध्वजाय॥

(७४)

कुन्दाय सम्मतिविदे रिपुतापनाय,
ज्योतिष्मते स्वबलरूपगुणान्विताय।
सर्वात्मने बलवतामवतां वराय,
तस्मै नमो भगवते गरुडध्वजाय॥

(७५)

सर्वासुवासमरिनाशकरं यतीशम्,
सन्मूर्तिमन्तमणुमन्तमनैक्यवन्तम् ।
मान्यं त्रिलोकपतिमद्य च यं श्रयामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(७६)

स्तव्यं स्तवप्रियमनामयमादिभूतम्,
स्वङ्गं विभूतिमनघं निखिलाक्षकान्तम् ।
लक्ष्मीनिवासमधुना यमहं स्मरामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(७७)

जीवं महान्तमिह धर्मकरं कृतज्ञं,
सत्त्वस्थमक्षरमहं सदसत्क्षरं यम् ।
देवेशमन्तकवरं मनसा भजामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(७८)

शान्ताय दर्पहननाय सुयामुनाय,
तीर्थङ्कराय सुरतन्तुविवर्धनाय ।
शून्याय शून्यविभवाय धराधराय
तस्मै नमो भगवते गरुडध्वजाय ॥

(७९)

शंखी गदी प्रहरणायुधमोदभोगी,
चक्री भुजङ्गशयनः कमलार्चितः सः ।
गोब्राह्मणप्रियमये शरणं यमीशम्,
तस्मै नमो भगवते गरुडध्वजाय ॥

(८०)

अक्षोभ्यमीश्वरमहं श्रुतिगायनं यम्,
यज्ञान्तकारिणमगुह्यमनात्मगुप्तम् ।
श्रीचक्रपाणिमधुना हृदये स्मरामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(८१)

यो निर्गुणोऽपि सगुणो यदजोऽपि जन्मी,
सर्वत्र पूजनवशस्त्ववतारदेवः ।
श्रीकान्तमद्य मनसा यमहं नमामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(८२)

अर्चिष्मते स्तुतिमते सुरभूशयाय,
सुश्रीमते जगति शूरजनेश्वराय ।
सत्कीर्तये स्मृतिमते सुकृतागमाय,
तस्मै नमो भगवते गरुडध्वजाय ॥

(८३)

ब्रह्मी महास्तुतिवशो जनधर्मतेजाः,
वर्णी जयी प्रियकरस्त्वसुरारिमानी ।
स्थूलोऽपि यो गुणनिधिस्त्वणुतोऽपि सूक्ष्मः,
तस्मै नमो भगवते गरुडध्वजाय ॥

(८४)

संहारणाय खलदुष्टनिशाचराणां,
सन्तापवन्तमरिविक्रमनाशवन्तम् ।
शक्त्या प्रतापगतिमन्तमये कृतीशं,
तस्मै नमो भगवते गरुडध्वजाय ॥

(८५)

देवेशदेवमथ नामसहस्रवन्द्यम्,
व्यासादिकाव्यपरिकीर्तितनामराशिम् ।
श्रीविष्णुदेवमधुना यमहं स्मरामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(८६)

मान्याय मान्यकृतये त्वपराजिताय,
भूस्वामिने जयवते बहुमानदाय ।
धन्याय भक्तजनकार्यविवर्धकाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(८७)

शब्दातिगाय बहुशब्दसहाय गोप्त्रे,
नेत्रे प्रियाय गह्वनाय च सर्वभोक्त्रे ।
निर्विण्णमानसपराय पराशनाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(८८)

सद्भूतिमन्तमतिदुर्गमवुर्गवन्तम्,
सत्कीर्तिमन्तमिह सत्कृतिमानवन्तम् ।
देवं नमामि यमहं सुरवंशवन्तम्
तस्मै नमो भगवते गरुडध्वजाय ॥

(८९)

चक्रप्रवीणमरुणाभगदाप्रवीणम्,
लोकाद्भुतं श्रमणरक्षकमग्रदेवम् ।
विद्यानिवासमधुना यमहं श्रयामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६०)

सिद्धार्थवन्तमयवन्तमहानिमन्तम्,
अक्रूरमाप्तशममूर्जितशासनं यम् ।
स्वान्ते विरोचनवरं यमहं नमामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६१)

रौद्राय भीषणकराय च सर्वहोत्रे,
दण्डाय दण्डपुरुषाय महाबलाय ।
संन्यासिदण्डविधृते क्षमिणां वराय,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६२)

लक्ष्मीश्वरं विलिख लेखनि ! नैजकाव्ये,
विष्णुं प्रभुं खलनिशाचरनाशकं तम् ।
तेजस्करं यमधुना शरणं व्रजामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६३)

या कथ्यते सुरगिराऽद्य मृता मनुष्यैः,
सा भारती तु न मृता ह्यमराऽस्ति, तस्यां
काव्यानि यस्य कृपया कवयो लिखन्ति,
तस्मै नमो भगवते गरुडध्वजाय ॥

(६४)

श्रेयस्करं सुतपसं रिपुनाशदक्षम्,
यं सन्धिमन्तममृतांशुमदृश्यरूपम् ।
श्रीवत्सवक्षसमहं शिरसा नमामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(९५)

स्वास्याय सर्वधनदाय समीरणाय,
कामाय कामफलदाय च कुन्दराय।
सुन्दाय सुन्दरशरीरविभूषिताय,
तस्मै नमो भगवते गरुडध्वजाय॥

(९६)

देवाग्रणीर्वसुमनाः स च सत्यधर्मा,
धन्वी सुघोष इह यो युधि वीरकर्मा।
स्वर्ग्रामणीः सुरमना भवमोक्षमार्गः,
तस्मै नमो भगवते गरुडध्वजाय॥

(९७)

यः पेशलो विनयिता स्वधृतस्त्वचिन्त्यः,
दुष्टान् सदा दमयिता गिरिसत्यमेधा।
क्षामः क्षमो बहुमुखश्च स एकमूर्ति-
स्तस्मै नमो भगवते गरुडध्वजाय।

(९८)

इन्द्रानुजं प्रधिषणाधरमप्रमेयम्,
सङ्कल्पदं विनयदं कुमुदं मुकुन्दम्।
श्रीशं महार्हमधुना यमहं प्रणौमि,
तस्मै नमो भगवते गरुडध्वजाय॥

(९९)

वेद्याय वैद्यपुरुषाय विवीरहाय,
श्रीजह्नवे सुरनदीप्रभवप्रदाय।
क्रोधापहाय शुचये धरणीधराय,
तस्मै नमो भगवते गरुडध्वजाय॥

(१००)

नन्दं सहस्रजितमुत्तरमादिजातम्,
विश्राममव्ययमनन्तमयोनिभूतम् ।
यं छिन्नसंशयमहं हृदये धरामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१०१)

नक्षत्रनेमिरिह यः शुभदस्त्रिसामा,
कृष्णाङ्ग आत्मविभवः सुरधर्मयूपः ।
यं भूरिदक्षिणमहं मनसा महामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१०२)

अव्यक्तरूपमजितं ह्यनिरुद्धशक्तिम्,
वन्दे प्रजाभवमनन्तजितं स्थविष्ठम् ।
यं शत्रुदारुणमहं शरणं प्रयामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१०३)

भीमाय भीमकृतये प्रपितामहाय,
यज्ञाय यज्ञपतये सुरजीवनाय ।
उत्तारणाय भुवि पावनकीर्तनाय,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१०४)

स्वस्थानवान् स्वहितवान् भूतिमान् प्रधीमान्,
आचारवान् सुनयवान् भयवान् कृपावान् ।
गोविप्रसाधुहितवान् विबुधैर्य उक्त-
स्तस्मै नमो भगवते गरुडध्वजाय ॥

(१०५)

संघर्षवानरिगणेन समं स युद्धे,
जेतुं हि तं समरनीतिपथं विकर्ता ।
यश्चक्रवान् प्रहरणायुधवान् सुधन्वा,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१०६)

नक्षत्रिवीरसुमुखं कुवलेशयं तम्,
वन्दे महोदधिशयं त्रिपुरारिवन्द्यम् ।
यं विश्वरेतसमहं हृदये भजामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१०७)

श्रीरोहिताय जगते कृतलक्षणाय,
व्योमाङ्गभाय सहयोगकृते सहाय ।
साध्वात्मने सुरमहातपसां वराय,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१०८)

त्वष्टारमादिजनकं जगतः सुघोषम्,
स्वाभाव्यभक्तजनचञ्चलताविरामम् ।
यं मेदिनीपतिमहं शरणं प्रपद्ये,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१०९)

नित्यं नमामि पुरतो यमहं स्वभक्त्या,
रामः स यत्र मुनियोगिवरा रमन्ते ।
यं रामदेवमधुना हृदये भजामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(११०)

गीतावचस्त्वनुसरन् भगवान् स कृष्णः
दुष्टान् हनिष्यति कलाववतीर्य चास्मिन् ।
यं वासुदेवमधुना मनसा स्मरामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१११)

लक्षण्यलक्षणवराय हविर्ग्रहीत्रे
दामोदराय शरभाय महीधराय ।
स्वस्थानदाय करणाय नृकारणाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(११२)

भक्तैः कृतस्तरुपतौ स च वेङ्कटेशः,
यो द्वारकापतिरिहास्ति स एव विष्णुः ।
पुर्यां स भक्तकथितो जगतस्तु नाथः,
तस्मै नमो भगवते गरुडध्वजाय ॥

(११३)

अल्लः स यो मुसलमाननृणां खुदा च,
यः कथ्यतेऽत्र गिरिजासु च गौड आंग्लैः ।
विष्णुः स एव बहुदेशजरूपभिन्नः,
तस्मै नमो भगवते गरुडध्वजाय ॥

(११४)

ओजोमरीचिपरितापममृत्युमन्तम्,
संवेगवन्तममृताशनमादिमन्तम् ।
इज्यं महेज्यमपि यं शरणं व्रजामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(११५)

स्वर्गस्पृशे रहसि सर्वदृशे समाय,
निष्ठाशमाय शमदाय च सामगाय।
निर्वाणदाय भिषजे वनमालिने च
तस्मै नमो भगवते गरुडध्वजाय ॥

(११६)

कौटुम्बमोहमथ रामकिशोर ! मुञ्च,
श्रद्धात्मजं भज सदा परमेश्वरं तम्।
यो जीवतन्तुरिह दुष्कृतिहा सदात्मा,
तस्मै नमो भगवते गरुडध्वजाय ॥

(११७)

नो कोऽपि कस्य जनको न सुतो न बन्धुः,
पत्नी न कापि, निखिलो भवबन्ध एषः।
त्यक्त्वाऽखिलं भज सदा परमात्मविष्णुम्,
तस्मै नमो भगवते गरुडध्वजाय।

(११८)

सद्भक्तिमन्तमतुलाभमहात्मवन्तम्
प्रांशुं सहिष्णुमतुलं जगदादिमन्तम्।
गोविन्दमद्य यमहं शिरसा नमामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(११९)

चन्द्रांशवे सुरशुचिश्रवसे दमाय,
देवाग्रजाय कमलाभशुभेक्षणाय।
मार्गाय नाकगमनाय सुमन्त्रदाय,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१२०)

भार्याग्रहं त्यज तथा परिवारमोहम्,
संन्यासमाश्रय भवेः परमात्मलीनः ।
यो निर्विकल्प इह सर्वजगन्नियन्ता,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१२१)

बुद्धौ मनो लय ततः कुरु तां स्वबुद्धिं
लीनां निजात्मनि, भवेः परमात्मविज्ञः ।
यो निर्विकल्प इह सर्वजगन्नियन्ता,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१२२)

सत्प्रीतिमन्तमथ भूसुरकान्तिमन्तम्,
सत्पुण्यवन्तमृतुमन्तमभीतिमन्तम् ।
आधारवन्तमिह यं शरणं प्रपद्ये,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१२३)

ओजोधृते भृगुणते कृतकर्मणे च
व्यग्राय भक्तकृतये च महाह्लदाय ।
श्यामाय सात्त्विकवराय महर्द्धये च
तस्मै नमो भगवते गरुडध्वजाय ॥

(१२४)

सुव्यक्तशक्तिबलरूपसमाहिताय
मात्रादिलोकजनबान्धवनन्दनाय ।
लोकारिरावणनिशाचरनाशनाय
तस्मै नमो भगवते गरुडध्वजाय ॥

(१२५)

कल्याणवन्तममिताशनमार्तिमन्तम्,
उत्साहवन्तमयवन्तमिहेतिमन्तम् ।
यं धर्मवन्तमृषिमन्तमहं श्रयामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१२६)

शुद्धान्तवन्तमिषुमन्तमरातिमन्तम्,
आचारवन्तममुपभोगविहारवन्तम् ।
यं सत्यवन्तमधुना मनसा स्मरामि,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१२७)

विष्णुं भजामि सततं प्रणमामि नित्यम्,
मध्ये दिने निशि च माधवमत्र सेवे ।
प्रातश्च सायमिह यं परिकीर्तयामि,
तस्मै नमो भगवते गरुडध्वजाय ।

(१२८)

भव्याय भव्यपरिधानविभूषिताय
प्राणाय सर्वविधजीवनजीवनाय ।
क्षेत्रादिबीजजनकाय रमेश्वराय
तस्मै नमो भगवते गरुडध्वजाय ॥

(१२९)

आचार्यवर्यकविरामकिशोरमिश्रो,
यद्वन्दनं व्यरचयद् गरुडध्वजस्य ।
तत्पाठकाय भुवि योऽत्र सुखानि दत्ते,
तस्मै नमो भगवते गरुडध्वजाय ॥

(१३०)

भारत उत्तरप्रदेश एटाजनपद-सोरोंवासी,
कालोदधिखात्माब्दे शुक्ले चैत्रे 'वाचस्पति'[1]-मान् ।
होतीलालकलावतीसुतो रामकिशोरमिश्र इह
श्रीगरुडध्वजसपादशतकं वसन्ततिलके कृतवान् ।।

१. वाचस्पतिः=पी एच० डी०

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी („ „)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) („)	रु० ३०.००
९.	„ „ „ (द्वितीय खण्डः) („)	रु० ३०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१५.	साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
१६.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् („) („)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) („ „)	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्रः)	रु० १२.००
२९.	लक्ष्मीशतकम्, (डा० वरदराजकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

दूरभाषः : ५५३४९९